# संस्कृतवार्ताः

दिनाङ्क :- 15.09.2025

प्रात: - 06:55

प्रधानमन्त्री-बिहार

प्रधानमन्त्री नरेन्द्र मोदी बिहारराज्यस्य पूर्णियातः आभासीय माध्यमेन चत्वारिंशत् सहस्रकोटिरूप्यकाणां बहुविधविकासात्मकपरियोजनानाम् उद्घाटनं शिलान्यासं च करिष्यति। प्रधानमन्त्री नवनिर्मितस्य पूर्णियाविमानस्थानकस्य उद्घाटनं च विधास्यति। श्रीमोदी बिहारराज्ये राष्ट्रियमखानाबोर्ड इत्यस्य अपि शुभारम्भं करिष्यति। असौ कोसी-मेची अन्तरराज्यीय नदीसम्बद्धपरियोजनायाः प्रथमचरणस्य अपि शिलान्यासं विधास्यति। रेलक्षेत्रे प्रधानमन्त्री अनेकासां परियोजनानाम् उद्घाटनं शिलान्यासं च करिष्यति, नूतनानां रेलयानानाम् आरम्भं च करिष्यति। अररिया गलगलिया मध्ये स्थितस्य नूतनस्य रेलमार्गस्य उद्घाटनं करिष्यति, अररिया-गलगलिया खण्डे रेलयानस्य उद्घाटनेन, पूर्वोत्तर बिहारस्य सम्पर्कव्यवस्थायाः परिष्कारः भविता। जोगबनी-दानापुरयोः मध्ये वन्दे भारतस्य आरंभो भवति, येन अररिया, पूर्णिया, मधेपुरा, सहरसा, खगरिया, बेगुसराय, समस्तीपुर, मुजफ्फरपुर, वैशाली, पटना इत्यादीनां मण्डलानां कृते लाभो भविष्यति।

प्रधानमन्त्री-कोलकाता

प्रधानमन्त्री नरेन्द्र मोदी अद्य कोलकातायाः विजयदुर्गे भारतीयसेनायाः मुख्यालये संयुक्तसेनापतिसम्मेलनस्य उद्घाटनं विधास्यति। सम्मेलनमिदं सितम्बरमासस्य सप्तदशदिनाङ्कपर्यन्तं भविष्यति। रक्षामन्त्री राजनाथसिंहः अपि अस्मिन् कार्यक्रमे उपस्थितो भविष्यति। प्रधानमन्त्री नरेन्द्र मोदी गतदिने सायंकाले कोलकातायां अगच्छत्, कोलकातायाः राजभवने रात्रौ स्थितवान् । कोलकातास्थे त्रिदिवसीयसंयुक्तसेनापतिसम्मेलने विश्वस्य वर्तमानराजनैतिकस्थितिविषये, प्रौद्योगिक्याः प्रगतिः विषये, त्रयाणां सशस्त्रसेनानां शाखानां समन्वयस्य विषये, आधुनिकीकरणस्य विषये च चर्च्यन्ते ।

प्रधानमन्त्री-असमयात्रा

प्रधानमन्त्री नरेन्द्रमोदी ह्यः असम-राज्ये त्रिशताधिक-षट्सहस्र-कोटिरूप्यकाणां प्रमुखसंरचनायाः औद्योगिकविकासस्य च परियोजनानां उद्घाटनम् अकरोत्। अस्मिन् अवसरे सः दरांग-जनपदस्य मंगलदोयी-क्षेत्रे जनान् सम्बोधितवान्। असौ प्रोक्तवान् यत् भारतं विश्वस्य द्रुतगत्या वर्धमानः देशः अस्ति तथा च असम-राज्यं देशस्य द्रुतगत्या वर्धमानेषु राज्येषु अन्यतमम् अभवत्। सः अवदत्

यत् एकविंशतितमायाः शताब्द्याः पञ्चविंशति-वर्षाणि गतानि, अधुना अस्याः शताब्द्याः अयं अग्रिमः भागः देशस्य वैश्विकपूर्वस्य पूर्वोत्तरस्य च वर्तते। विकास-प्रकल्पेषु दरांग-चिकित्सकीय-महाविद्यालयः तथा चिकित्सालयः, जी.एन.एम.विद्यालयः, बी.एस.सी. नर्सिंग-महाविद्यालयाश्च सम्मिलिताः सन्ति, इमे अस्मिन् क्षेत्रे चिकित्सा-शिक्षायाः, स्वास्थ्य-सेवायाश्च सुदृढीकरणं करिष्यन्ति।

ऋतु- विज्ञान-विभाग:

भारत-ऋतु-विज्ञान-विभागेन अद्य बिहार-उपहिमालयीय-पश्चिमबङ्गाल, अरुणाचलप्रदेश-असम- मेघालय-गोवा-सिक्किम्-राज्यानां पृथक्-पृथक् स्थानेषु प्रचण्डतः अतिवृष्टेः पूर्वानुमानं प्रकटितम्। उत्तराखण्डे, हिमाचलप्रदेशे, छत्तीसगढे, आन्ध्रप्रदेशे, मध्यप्रदेशे, महाराष्ट्रे, नागालैण्ड् राज्ये, मणिपूरे, मिजोरम राज्ये, त्रिपुरायां, उत्तरीय-कर्नाटके, ओडिशायां, तेलङ्गानायां चापि अद्य प्रचण्डवृष्टिः भविष्यति इति विभागेन पूर्वानुमानितम्।

क्रिकेट-एशियाचषकः

पुरुषक्रिकेट्-क्रीडायां ह्यः सायं दुबईनगरे प्रचल्यमाणायाः विंशति-प्रतिविंशति-एशियाकप-प्रतियोगितायाः अ-समूहस्य सङ्घर्षे भारतीयदलं विजयं अवाप्नोत्।